# ॥ શ્રીરામકૃષ્ણપરમહંસોપદેશાવલિઃ ૧ ॥

.. Shri Ramakrishnopadeshavalih 1 ..

sanskritdocuments.org

August 22, 2017

# .. Shri Ramakrishnopadeshavalih 1 ..

# ॥ શ્રીરામકૃષ્ણપરમહંસોપદેશાવલિઃ ૧ ॥

## Sanskrit Document Information

Text title : Shri RamakrishnaparamahamsopadeshAvaliH 1

File name : rAmakRiShNopadesha1.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Sw. Ramakrishnananda (1863-1911)

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : English and Hindi translations in the source book

Source : ShriRamKrishna UpadeshSahasri by Swami Apurvananda

Latest update : July 10, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 22, 2017

*sanskritdocuments.org*

વિયત્તલે સૂર્યવિભાપ્રભાવાદ્
યથા દિવા ખે ન વિભાન્તિ ભાનિ ।
વિભુન્તથા મોહબલાદૃષ્ટ્વા
નિરીશ્વરં કેઽપિ વદન્તિ વિશ્વમ્ ॥ ૧॥

અપ્યબ્ધિનીરં લવણેન પૂર્ણં
નાસ્વાદનાત્ પ્રાગવગમ્યતે કૈઃ ।
ઇદં જગત્ પૂર્ણમપીશશક્ત્યા
કસ્તાં વિજાનાતિ વિના સુચેષ્ટામ્ ॥ ૨॥

ઉડ્ડીયમાનો વિયતીહ ગૃધ્રો
દૃષ્ટિં યથાયં કુણપેષુ ધત્તે ।
દૃષ્ટિસ્તથા યાત્યપિ પણ્ડિતાનાં
નિરર્થકેષ્વર્થયશઃસુ નિત્યમ્ ॥ ૩॥

યતોઽભ્યાસાત્ સ્વભાવોઽયં સ્ત્રીપુંસાં જાયતે ધ્રુવમ્ ।
યતઃ સર્વઃ સદૈવેહ સ્વભાવમનુવર્તતે ।
કદભ્યાસં તતઃ સર્વો વિહાય સત્સ્વભાવતઃ ।
સદ્ભાવાન્ સમનુષ્ઠાય વિમલાનન્દભાગ્ ભવેત્ ॥ ૪॥

કૃપણેષુ યથાર્થેષુ સ્પૃહાસ્તિ બલવત્તમા ।
તથૈવ તવ લોભોઽસ્તુ શ્રીહરેઃ પાદસેવને ॥ ૧॥

ફલોદયે ક્ષયં યાન્તિ યથા પુષ્પદલાનિ વૈ ।
જ્ઞાનોદયે તથા હ્યત્ર માનમોહમદાન્ધતાઃ ॥ ૨॥

હૃદાકાશમિદં યાવદ્ વાસનાતમસાવૃતમ્ ।
બ્રહ્મસૂર્યોદયસ્યાસ્મિન્ તાવદ્ વૈ સમ્ભવઃ કુતઃ ? ॥ ૩॥

તાવદ્ ગુઞ્જતિ ભૃઙ્ગોઽયં યાવત્ પુષ્પં ન ગચ્છતિ ।
પુષ્પાલિઙ્ગનમાસાદ્ય નિઃશબ્દો મધુપઃ સદા ॥ ૪॥

તથાયં પણ્ડિતસ્તાવદ્ વાદતર્કપરાયણઃ ।
પાણ્ડિત્યઘોષણાયોચ્ચૈઃ શાસ્ત્રાર્થકથનોત્સુકઃ ॥ ૫॥

શાસ્ત્રાણાં પ્રતિપાદ્યસ્ય સર્વેષામીશ્વરસ્ય તુ ।
યાવન્ન લભતે ભક્તિં પાદપઙ્કજયુગ્મયોઃ ॥ ૬॥

યદા તુ તત્કૃપાલેશાત્ તદ્ભક્તિં લભતે પરામ્ ।
તદાલોકનનિર્વૃત્યા નિશ્ચેષ્ટો જાયતે તદા ॥ ૭॥

ચિત્તે માયાપરિચ્છિન્ને વિભુર્નૈવ વિકાશતે ।
રૂપં મલસમાચ્છન્ને દર્પણે કિં પ્રકાશતે ? ॥ ૮॥

યથા ઘનઘટાકાશે સૂર્યમાવૃત્ય તિષ્ઠતિ ।
મહામાયા તથૈવેહ વિભુમાવૃત્ય વર્તતે ॥ ૯॥

માયાયાં વિગતાયાન્તુ વિભુઃ સર્વત્ર ભાષ્યતે ।
જલદેઽપગતે સૂર્યો યથા સર્વત્ર દીપ્યતે ॥ ૧૦॥

તરઙ્ગસઙ્કુલેઽમ્ભોધૌ ચન્દ્રબિમ્બાનિ ખણ્ડશઃ ।
ખેલન્તીવ યથા ચન્દ્રં સંવિભજ્ય સહસ્રશઃ ॥ ૧૧॥

તથા સુચઞ્ચલે ચિત્તે સંસારાબદ્ધચેતસામ્ ।
પવિત્રેઽપિ બ્રહ્મભાવાઃ ક્ષણમાયાન્તિ યાન્તિ ચ ॥ ૧૨॥

સહસ્રવત્સરવ્યાપિ-તમઃપૂર્ણગૃહોદરમ્ ।
સર્વત્ર દ્યુતિમદ્ભાતિ દીપયોગાદ્યથાઞ્જસા ॥ ૧૩॥

મનોમલં કિલ્બિષાખ્યં સહસ્રજન્મસઞ્ચિતમ્ ।
શ્રીહરેઃ કરુણાલેશાત્ તથા તૂર્ણં પલાયતે ॥ ૧૪॥

ત્યજન્તિ સાત્ત્વિકાઃ સર્વં કથં ગોવિન્દમાનસાઃ ।
ધનં ધાન્યં યશોમાનં પુત્રદારગૃહાદિકમ્ ? ॥ ૧૫॥

વિસ્મૃત્ય નિખિલાન્ ભોગાન્ વિહાય જીવિતસ્પૃહા ।
પતઙ્ગોઽયં યથા યાતિ પ્રદીપ્તજ્વલનં પ્રતિ ॥ ૧૬॥

યથાપિ મક્ષિકા તૂર્ણં તુચ્છીકૃત્ય સ્વજીવિતમ્ ।
પરમાનન્દમાસ્થાય મધુભાણ્ડે નિમજ્જતિ ॥ ૧૭॥

તથેતરરસાન્ સર્વાન્ વિસ્મૃત્ય સંવિહાય ચ ।
શ્રીવિષ્ણુમુપગચ્છન્તિ ભગવત્પરમાયણાઃ ॥ ૧૮॥

જલં યથા ભિન્નનામભિઃ બ્રુવતે જનાઃ ।
“ઓવાટરિતિ” વા કેચિદ્ “આકોવા” ઇતિ વા પરે ॥ ૧૯॥

“પાનીતિ” વા વદન્ત્યેકે ત્વભિન્નં સલિલં ભુવિ ।

તથૈવં સચ્ચિદાનન્દં નામભિર્બહુભિઃ પૃથક્ ।
વદન્તિ ભિન્નપુરુષા "અલ્લા" "ગૉડ્" "જિહોવે"-તિ વા ॥ ૨૦॥

"અધુનૈવ મયા દૃષ્ટઃ કૃકલાસો મનોહરઃ ।
વૃક્ષશાખાગ્ર-ભાગેઽસ્મિન્ રક્તવર્ણઃ સમુજ્જ્વલઃ ॥ ૨૧॥

પત્રાન્તરં પ્રવિષ્ટોઽસૌ ઇદાનીન્તુ ન દૃશ્યતે ।
કિં ભ્રાતઃ સ ત્વયા દૃષ્ટઃ સરટો ભૃશમદ્ભતઃ" ॥ ૨૨॥

ભ્રાતર્મયાપિ દૃષ્ટોઽસૌ નૂનં પીતો ન રક્તભાક્ ।
તસ્ય તદ્વચનં શ્રુત્વાઽબ્રવીત્તં પ્રથમોઽધ્વગઃ ॥ ૨૩॥

"કિં કામલરુજા ભ્રાતર્દૃષ્ટિસ્તે કલુષીકૃતા ।
કથં ત્વં મન્યસે પીતમમું કોકનદચ્છવિમ્" ॥ ૨૪॥

પરિહાસમિમં શ્રુત્વા તમુવાચ તતોઽપરઃ ।
"નાહં કામલવાનસ્મિ ન મે દૃષ્ટિર્ભ્રમાત્મિકા" ॥ ૨૫॥

"પીતં દ્રક્ષ્યામિ શોનં ચેદ્ યાસ્યામિ દુષ્ટદૃષ્ટિતામ્ ।
પીતાન્ સરટનિવહાન્ વિધાતા સૃષ્ટવાન્ પુરા ॥ ૨૬॥

રક્તોઽસૌ સરટો નૂનં નવસૃષ્ટિસ્તવાધુના ।"
ઇત્થં વિવદમાનૌ તૌ તૃતીયઃ પ્રાપ્તવાન્ પથિ ।
સાગ્રહં સમકાલઞ્ચ તં પ્રાપ્ય પૃચ્છતઃ સ્મ તૌ ॥ ૨૭॥

ભ્રાતર્યદિ વિજાનાસિ સત્યં નુ વદ સામ્પ્રતમ્ ।
"કિંવર્ણઃ સરટો ભાતિ પીતઃ કિમુત લોહિતઃ "॥ ૨૮॥

તયોસ્તદ્વચનં શ્રુત્વા સસ્મિતં તાવુવાચ નઃ ।
"યુવયોર્વચને સત્યં બહુરૂપઃ સ એવ હિ ॥ ૨૯॥

પત્રાન્તરેઽસૌ હરિતોઽપિ ભૂત્વા ચાપેક્ષતે કાલવશાત્ પ્રનેયાન્ ।
આહાર્યકીટાનતિતીક્ષ્ણદૃષ્ટિઃ સ્વપત્રવર્ણાચ્ચ સુગુપ્તદેહઃ ॥ ૩૦॥

આહાર્યમાહર્તુમનેકરૂપં પ્રયોજનસ્યાનુમતં સ ધત્તે ।
સ્વભાવમિત્યસ્ય નિરીક્ષ્ય ધીરા ઇમઞ્ચ નિત્યં બહુરૂપમાહુઃ ॥ ૩૧॥

અનન્તભાવસ્ય ચ વિશ્વમૂર્તેર્દભ્રાન્ વિભિન્નાનધિગમ્ય ભાવાન્ ।
પરસ્પરં મૂઢમનુષ્યસઙ્ઘાઃ ઇત્થં પૃથિવ્યાં વિવદન્ત એવ ॥ ૩૨॥

યુવાં તતો નાર્હથ એવમેવ ચિત્તે નિધાતું ખલુ દીનભાવમ્ ।
નાન્યસ્ય ધર્મે કુરુતઞ્ચ નિન્દાં સર્વે વિવાદા હિ તમઃપ્રસૂતાઃ ॥ ૩૩॥

ઇતિ ।

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. Shri Ramakrishnopadeshavalih 1 ..
Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996
on August 22, 2017

Please send corrections to *sanskrit@cheerful.com*